॥श्रीहरिः॥

अवधविहारीसंस्कृतमहाविद्यालयः रहीमपुरः खगड़िया
अङ्गीभूतः - कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय,
दारबङ्गः।

शास्त्री द्वितीय-खण्ड, विषयः-
साहित्यम, अनिवार्य प्रथम पत्रम
अनिवार्य दर्शनम। भागः - १०

तर्कसंग्रहः
[प्रत्यक्षपरिच्छेदः - न्यायबोधिनीसंवलिता]

मूलकृता -

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।

न्यायबोधिनीकृता -

मनोलक्षणं व्याख्यातुमारभते - मनो निरूपयति - सुखादीति। उपलब्धिर्नाम साक्षात्कारः। सुखाद्युपलब्धिसाधनमिन्द्रियं मन इत्यत्रोपलब्धिपदेन साक्षात्कार एव ग्रहीतव्योऽन्यथा सुखादीनां स्मृत्यात्मकोपलब्धिं प्रति चक्षुरादेरप्युद्बोधकज्ञापकतया साधनत्वात्तत्रातिव्याप्तिः प्रसज्येतेति भावः। पर्यवसितं लक्षणमाह तथा च सुखदुःखादिसाक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसो लक्षणम्। मनसि सुखदुःखादिसाक्षात्कारकारणत्वस्येन्द्रियत्वस्य च सत्वाल्लक्षणसमन्वयः। अत्र यदीन्द्रियत्वमेव मनसो लक्षणं स्यात् तदा चक्षुरादेरपीन्द्रियत्वात् तत्रातिव्याप्तिः स्यात्, अतः सुखादिसाक्षात्कारकारणत्व-विशेषणम्।

तथा च चक्षुरादेः सुखादिसाक्षात्कारेऽकारणत्वान्नातिव्याप्तिः। एतत्सर्वमाह - इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिरतः सुखादिसाक्षात्कारकारणत्व विशेषणम्।

विशेष्यानुपादाने आत्मन्यतिव्याप्तिः, अत्र हेतुमाह - आत्मानः सुखादिकं (प्रति) साक्षात्कारं प्रति समवायिकारणत्वात्। अत इन्द्रियत्वरूपविशेष्योपादानम् - इन्द्रियत्वस्य लक्षणे प्रवेश इत्यर्थः। एवञ्च आत्मन इन्द्रियत्वाभावान्न तत्र मनोलक्षणातिव्याप्तिरिति भावः।


अवधेश कुमार शर्मा
सहायक प्राचार्यः (व्याकरणम्)
अ. वि. सं. म. वि. रहीमपुरः खगड़िया।